# Shri Ratnasimhasaniya Shri Sita Panchayatana Stotram

# શ્રીરત્નસિંહાસનીય શ્રીસીતાપઞ્ચાયતન સ્તોત્રમ્

## Document Information


Text title : Sita Panchayatana Stotram

File name : sItApanchAyatanastotram.itx

Category : devii, sItA

Location : doc_devii

Proofread by : Prabhav Tengse

Latest update : August 6, 2023

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 6, 2023

*sanskritdocuments.org*

# શ્રીરત્નસિંહાસનીય શ્રીસીતાપઞ્ચાયતન સ્તોત્રમ્

વન્દે વિદેહતનયાપદપુણ્ડરીકં
    કૈશોરસૌરભસમાહૃતયોગિચિત્તમ્ ।
હન્તું ત્રિતાપમનિશં મુનિહંસસેવ્યં
    સમ્માનશાલિપરિપીતપરાગપુઞ્જમ્ ॥ ૧॥

દુર્વાદલદ્યુતિતનું તરૂણાબ્જનેત્રં
    હેયામ્વરાંવરવિભૂષણભૂષિતાઙ્ગમ્ ।
કન્દર્પકોટિકમનીયકિશોરમૂર્તિં
    પૂર્તિં મનોરથભુવામ્ભજજાનકીશમ્ ॥ ૨॥

કપૂરગૌરવપુષં શરદિન્દુવક્ત્રં
    નીલામ્બરં સરસિજાક્ષમનન્તમાદ્યમ્ ।
વામોર્મિલં લલિતભૂષણભૂષિતાઙ્ગં
    રામાનુજં જમનોઽભયદં નિજાનામ્ ॥ ૩॥

વિશ્વમ્ભરં ભરતમમ્બુજપત્રનેત્રં
    નીલામ્બુદામવપુષં કનકાભવસ્ત્રમ્ ।
ભક્તાભયપ્રદમનેકવિભૂષણાઢ્યં
    જાડ્યાપહં સુભજતાં ભજમાણ્ડવીશમ્ ॥ ૪॥

કૈશોરમૂર્તિમનુરૂપમનૂપરૂપં
    પઞ્ચેષુ સુન્દરતનું શ્રુતિકીર્તિકાન્તમ્ ।
ગૌરં સુવર્ણમણિભૂષણમમ્બુજાક્ષં
    પીતામ્બરં ભજમનોઽખિલ સિદ્ધિહેતુમ્ ॥ ૫॥

ઉદ્યદ્દિનેશકરરઞ્જિતકઞ્જવક્ત્રં
    પિઙ્ગારુણાબ્જનયનં નયનાભિરામમ્ ।
સૌવર્ણવર્ણવસનં રત્નાદિભૂષં
    ભક્તેષ્ટકામદતરું ભજ વાયુસૂનુમ્ ॥ ૬॥

શ્રીસીતાપઞ્ચાયતનસ્તોત્રં પ્રાતઃકાલે પઠેત્તુયઃ ।
ઇહલોકે પરેવાઽપિ તસ્ય કિઞ્ચિન્નદુર્લભમ્ ॥ ૭॥

ઇતિ સુન્દરીતન્ત્રોક્તં શ્રીરત્નસિંહાસનીય
શ્રીસીતાપઞ્ચાયતન સ્તોત્રમ્ ॥

Proofread by Prabhav Tengse

---

*Shri Ratnasimhasaniya Shri Sita Panchayatana Stotram*
pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*